# शब्दतत्त्वनिर्वचनम्

कुमारखतिवडाः
उपप्राध्यापकः, वि.पी.को.सं.विद्यापीठम्
kumarsir750@gmail.com

**शोधसारः**

आलेखोऽयं शब्दतत्त्वनिर्वचनाय प्रस्तुतो दृश्यते । शब्दतत्त्वनिरूपणप्रसङ्गेऽनेकेषां दार्शनिकानां मतभेदो दरीदृश्यते। नैयायिकानां शब्दतत्त्वविमर्शे वर्णसमूहरूपस्य मानसव्यापारस्य शब्दत्वमभीष्टं तत्र च संस्कारद्वारा घटादौ पूर्वपूर्ववर्णवत्त्वमव्यवहितोत्तरत्वेन जायमाने शब्दरूपस्यापि प्रत्यक्षत्वमिति वर्णितम् । मीमांसकानां कृते तु प्रत्येकं वर्णस्य शब्दरूपत्वमस्ति, पदान्यपि वर्णसमूहरूपाण्येव सन्तीति प्रस्तुतम्। परन्त्वेतेषां मतानि वैयाकरणमतेन सम्य_ गालोचितानि। प्रत्येकं वर्णस्य वर्णसमूहस्य वा संस्कारवतो पि पदस्य शब्दत्वमस्वीकरणीयमस्ति। उत्पत्तिनाशवद्व_ र्णसमूहस्यानित्यत्वेन पदप्रत्यक्षाभावात्। तथैव संस्कारस्थितेश्चापि विपरीतोद्बोधे सति अन्यार्थबोधान्नैयायिकादीनां मतमप्यत्र सम्यगालोचितं दृश्यते। तथैव मुख्यरूपेण सिद्धान्तरूपेण च शब्दतत्त्वनिरूपणे वैयाकरणसम्मतः स्फोटवा_ दोऽत्र स्थापितः। यद्यपि ध्वनि-नादरूपस्यापि चर्चात्र कृतास्ति, परं निष्कर्षतो मध्यमानादव्यङ्ग्यस्य स्फोटस्य शब्द_ त्वं स्वीकृतमस्ति । अष्टविधानां स्फोटानां प्रयोगदशायां व्यवहारेऽपि मुख्यतो शब्दनित्यतावादीनां वैयाकरणानां वाक्यस्फोट एव प्रामुख्यं भजते। तथैव पातञ्जलानुगामिनां भर्तृहर्यादीनां स्वीकृतं शब्दब्रह्माप्यत्र चर्चितम्। यस्य ब्रह्मणो विवर्तरूपं समग्रं चराचरं जगत्तादृशं सर्वव्यापकं ब्रह्म शब्द एवास्तीति निष्कर्षायितम्। शब्दनित्यतायामेव तात्पर्यादपशब्दस्थाने साधुशब्दा प्रयोक्तव्या इति सर्वे सर्वपदादेशाः इत्यात्मको व्यवहारोऽपि दर्शितः । एत एव विषया अस्मिन्नालेखे प्रामुख्येन दर्शिता विद्यन्ते।

**शब्दबीजम्**

कूटस्थः, शब्दब्रह्म, स्फोटः, विवर्तः, अक्षरम्।

**विषयपरिचयः**

प्रकृतिप्रत्ययादिविश्लेषणं विधाय अर्थनिर्धारणं व्याकरणशास्त्रं करोति । अत एव व्याक्रियन्ते व्युत्पाद्यन्ते असाधुभ्य विविच्य साधुत्वेन बोध्यन्ते शब्दा अनेन असौ इति व्याकरणमिति व्याकरणस्य व्युत्पत्तिः । "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेय इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. १०)। इति भाष्यवचनमपि मननीयमस्ति। शब्दसाधुत्वविष्ज्ञ षयकमेव व्याकरणमस्ति। अपभ्रंशापशब्दान् निराकृत्य साधुशब्दमेव व्याकरोति। "साधुत्वज्ञानविषया सैषा व्याक_ रणस्मृतिः" (वा.प. १/१४१) इति हरिवचनमपि व्याकरणस्य शब्दसाधुत्वविषयकत्वं द्रढीयति। अतो वैयाकरणदर्श_ नं खलु शब्दपरकमस्ति। वेदस्य मुखरूपाङ्गस्य व्याकरणशास्त्रस्य महत्त्वं लौकिकवैदिकसाहित्येषु समानरूपं विद्यते । "रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. ९) व्याकरणस्य प्रयोजनत्र रूपेण उक्तमस्ति।। शब्दं विना कस्यापि वस्तुनोऽस्तित्वं न विद्यते। अतो तादृशस्य शब्दस्यानुशासकत्वेन व्याकर_ णस्यापि महन्महत्त्वं विद्यते। व्याकरणस्य प्रधानो विषय एव शब्दोऽस्ति। शब्दप्रमाणकं व्याकरणम्। शब्दप्रमाणका

वयम्, यच्छब्द आह तदस्माकं प्रमाणम् इति (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. ४१) । अतः प्रमुखदर्शनेषु व्याकरणदर्शनस्य शब्दब्रह्मवादस्यापि पृथङ्महत्त्वं वरीवर्ति । विशेषतोऽर्थग्रन्थस्य निर्माणेन वैयाकरणसिद्धान्तानां प्रकाशो भूतवानस्तीति निश्चप्रचम् । तेष्वर्थग्रन्थेषु स्फोटवाद-समासशक्तिवादादिनानाविषयाः प्रतिपादिता व्याख्याताश्च सन्ति । तत्र स्फोटवादे शब्दतत्त्वस्य विषयोऽपि संलग्नोऽस्ति । वैयाकरणसम्प्रदाये शब्दस्य नित्यत्वमुररीक्रियते जगति सर्वेऽपि विषया दृश्यन्ते ते सर्वे शब्दस्य परिणामा एव इत्यस्य दर्शनस्य विषयः । अतो शब्दं व्यवस्थाय वाणीसंस्कारकरणेन शब्दानुशासकं शास्त्रमप्युच्यते । व्यवहारेऽर्थप्रत्यायकत्वं शब्दस्य सामान्यलक्षणमस्ति । शब्दश्च ध्वनिरूपः, वर्णादिरूपोऽस्ति । वैयाकरणदर्शने शब्दस्य स्फोटरूपत्वं ब्रह्मरूपत्वं नित्यत्वञ्च स्वीक्रियते । विशेषतश्चतुर्षु नादेषु मध्यमानादस्य व्यङ्ग्यरूपेण स्फोटात्मकः शब्दः स्वीकृतः, अतः स्फोटरूपेणैव तस्य नित्यत्वं स्वीक्रियते । ध्वनिरूपन्तु सरलतया बोद्धुमुक्तमस्ति । स्फोटस्यापि अष्टविधत्वमस्ति । वर्णपदवाक्यादिभेदेनाखण्डसखण्डरूपेण जातिव्यक्तिभेदेनाष्टौ सन्ति । परन्तु वाक्यजातिस्फोटस्यैव प्रामुख्यं वैयाकरणा मन्वते । तत एवार्थप्रत्यायनात् । अतोऽन्येषु दर्शनेष्ववर्णितः पृथग्वादरूपेण वैयाकरणसिद्धान्ते स्फोटवादोऽस्ति, तादृशस्फोटात्मकशब्दादेव समग्रं कार्यं भवति । अस्माकं पूर्वीयग्रन्थेषु शब्दादेव समग्रचराचरस्य सृष्टिरजायत इत्यपि वर्णितमस्ति । यथा- "स भूरिति व्याहरत् भुवमसृजत्", "वागेव विश्वा भुवनानि जज्ञे" इत्याद्याः श्रुतयः शब्दादेव सृष्टिरिति पोषयन्ति । अतो शब्दस्य शक्तिः परमा विद्यते । समस्तं वाङ्मयं खलु शब्दगुम्फितं वर्तते अनादिनिधनरूपं अक्षररूपं स्फोटात्मकं पदार्थानां विवर्तकं शब्दब्रह्म इति वैयाकरणसिद्धान्तः । अतस्तादृशस्य शब्दस्य स्वरूपस्य तथा शब्दतत्त्वस्य च निर्वचनं चात्र प्रस्तूयते ।

## शोधसमस्या

वैयाकरणसिद्धान्ते प्रतिपादितस्य शब्दतत्त्वस्य निर्वचनमेव प्रमुखा समस्या अस्ति । अनया समस्यया सह सम्बद्धा निम्नाङ्किताः समस्या अपि दर्शयितुं शक्यन्ते-

क) शब्दतत्त्वस्य स्वरूपं किम् ?

ख) वैयाकरणसम्मतशब्दतत्त्वस्य निर्वचनं कीदृशम् ?

## शोधोद्देश्यम्

शोधसमस्यायां लिखितानां समस्यानां समाधानमेव प्रस्तुतशोधकार्यस्य मुख्यमुद्देश्यमस्ति । अस्य शोधकार्यस्य मुख्योद्देश्यानि अधोदर्शितरीत्या विभक्तुं शक्यन्ते-

क) शब्दतत्त्वस्य स्वरूपप्रदर्शनम्

ख) वैयाकरणसम्मतशब्दतत्त्वस्य निर्वचनम्

## अध्ययनविधिः

प्रस्तुतस्य शोधकार्यस्य सम्पादनाय मुख्यरूपेण विश्लेषणात्मक-तुलनात्मकविधी अङ्गीकृतौ स्तः । शब्दतत्त्वसम्बद्धानां विषयाणां वैयाकरणमतेन तुलनात्मकं विश्लेषणं विधाय निष्कर्षः स्थापितो वर्तते ।

## सामग्रीसङ्कलनविधिः

प्रस्तुतशोधकार्यसम्पादनाय पुस्तकालयविधिना मञ्जूषाभूषणसारादिग्रन्थानां प्राथमिकसामग्रीरूपेण तथा मूलग्रन्थव्याख्यानग्रन्थटीकादीनां द्वैतीयिकसामग्रीरूपेण सङ्कलनं कृतं विद्यते, तथा च शब्दतत्त्वसन्दर्भे

विदुषामालेखाः महाभाष्यवाक्यपदीयादिग्रन्थाश्च सहायकसामग्रीरूपेण प्रयुक्ता विद्यन्ते।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

वैयाकरणसम्मतः शब्दतत्त्वविषय एवास्य क्षेत्रमस्ति । अत्र एव व्याकरणस्यार्थग्रन्थसम्बद्धाः सर्वे शब्दतत्त्वप्रतिपादका ग्रन्थास्तथा शब्दतत्त्वविषया अस्य क्षेत्रमस्ति। शब्दतत्त्वविषयका आलेखा अस्य क्षेत्ररूपेण सन्ति चेदतिरिक्ता सर्वे विषया अस्य सीमारूपेण सन्ति।

## शब्दस्वरूपम्

वैदिककालादेवारभ्य शब्दतत्त्वस्य विषये तस्य स्वरूपस्य विषये च दार्शनिकः सिद्धान्तो विवेच्यमानोऽस्ति। तत्र वैयाकरणनयेऽपि शब्दस्य स्वरूपविषये चर्चा जायमानास्ति। शब्दस्य स्वरूपं प्रकारं वा सङ्गठनमिति बुध्यते। शब्दाश्च निर्माणसन्दर्भे पञ्चधा भवन्ति। कृदन्तास्तद्धितान्ताः समासयुक्तास्तथा मूलशब्दा वा उणादिनिष्पन्नास्तथा तिङन्ताः। यद्यपि द्वित्वयुक्ताः शब्दा अपि सन्तीति वक्तुं शक्यते, तथापि तेषां शब्दानां द्वित्वकरणात्पृथक्त्वेन गणना न क्रियते। वैयाकरणनिकाये कृदन्तादित्रयस्य व्युत्पन्नत्वेन "कृत्तद्धितसमासाश्च"(अष्टाध्यायी १/२/४६) इत्यनेन प्रातिपदिकत्वं भवति, तत्पश्चात्प्रयोगयोग्यो भवति। तथैवान्येषामव्युत्पन्नानामपि "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (अष्टाध्यायी १/२/४५ ) इत्यनेन प्रातिपदिकत्वात् प्रयोगयोग्यो भवति। प्रातिपदिकत्वाभावे सुबादयः प्रत्यया नागच्छन्ति। प्रातिपदिकत्वादेव सुबादयः प्रत्यया आगच्छन्ति, सुबन्तत्वात्पदत्वं सम्भवति। तिङन्तानामपि प्रातिपदिकत्वाभावेऽपि तिङन्तत्वादेव पदत्वं सम्भवति। सुबन्ततिङन्तयोः पदत्वसंज्ञा च "सुप्तिङन्तं पदम्" (अष्टाध्यायी १/४/१४) इत्यनेन क्रियते। अपदं न प्रयुञ्जीत इति वचनानुसारं परिनिष्ठितपदानामेव प्रयोगोऽपरिहार्यः। शब्दाश्चानेके सन्ति। गणना कर्तुं न शक्यते। बृहस्पतिसदृशो ज्ञाता इन्द्राय दिव्यवर्षसहस्रपर्यन्तं शब्दपारायणं कृत्वाऽपि पारं न प्राप्तवान् इति श्रूयते। यथा-" बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. २५)। अत एव शब्दानां पारायणेन शब्दस्य ज्ञानपूर्वकं प्रयोगो न सम्भवतीति उत्सर्गापवादादिरूपेण सूत्रं कृत्वा शब्दानां प्रयोगनियमो निर्दिश्यते वैयाकरणैः। तथैव प्रकारभेदेनापि शब्दा द्विधा भवन्ति। वैदिका लौकिकाश्च। लौकिका गौरश्वः पुरुषो हस्तीत्यादयः। वैदिका अग्निमीले पुरोहितम्०, शन्नो देवीरभिष्टये०, इषे त्वोर्जेत्वा०, अग्न आयाहि वीतये० इत्यादयः सन्ति (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. ६)। सूत्रकारैः सूत्रकरणेनासाधुशब्दनिराकरणेन साधुशब्दस्य प्रतिपादनं तथा प्रयोगाय निर्दिश्यते चेच्छब्दश्च कः ? वर्णपदवाक्यादिरूपो वा ध्वनिरूपः ? इति शङ्का भवति। तथैवैतस्य शब्दस्य नित्यत्वमुत वानित्यत्वमिति सन्देहः। यतो हि लोके शब्दार्थयोरभेदेन व्यवहारो भवति, अतश्च शब्दस्वरूपनिर्धारणमावश्यकम्। गौरयं शुक्लोऽस्ति इति वाक्ये शब्दार्थयोरभेदेन शुक्लयुक्तस्य वृषभस्य भानं भवति। तत्र व्यवहारो भवति। यथा माणवकमानय, घटमानय इत्युक्तेस्तादृशयुक्ते पदार्थेऽभेदेन व्यवहारो भवति। अतः गौरादिकथनेषु प्रतिभासमानेषु वस्तुषु शब्दश्च कः ? इति निश्चयः कर्तुमावश्यकः। गौरिति उच्यमाने पदार्थे तादात्म्येन शब्दविधेयताप्रतीतेः। यतोहि शब्दार्थयोस्तादात्म्यमेव शक्तिः। जात्यादिव्यक्त्योरिव शब्दार्थयोरपि तादात्म्यमस्ति, यथा- रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः इत्यादौ शब्दार्थयोरपि अभेदेन व्यवहारः। अतो गौरित्यत्र सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः ? इति जिज्ञासा। गुणसमूहो द्रव्यम् इति पक्षे सास्नालाङ्गूलादियुक्तं अर्थ रूपं वस्तु स शब्दाभिधेयः किम्? इत्यर्थः। तदुत्तरे नेत्याह यतो हि भिन्नेन्द्रियग्राह्यत्वाद्द्रव्यस्य शब्दत्वं नोररीक्रिय-

ते । द्रव्यस्य शब्दत्वं न सम्भवति चेत् तत्र निमिषितं चेष्टितं तदिङ्गितमिति शब्दः स्वीकरणीयः ? इति, अर्थात् तत्पदार्थेन कृता क्रिया एव शब्दः स्वीकरणीयः ? इति । पूर्वोक्तरूपेण क्रियात्वेन इङ्गितादीनां शब्दत्वं न स्वीक्रियते । गवि यच्छुक्लनीलकपिलकपोतादयः सन्ति ते शब्दाः ? इति आशङ्कायां तेषां शब्दत्वं स्वीकर्तुं न शक्यते । ते गुणा एव सन्ति । गुणस्यापि शब्दत्वं नोररीक्रियते । तद्भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यभूतं यदस्ति स शब्दः स्वीकरणीयः ? नहि आकृतिरस्ति गोत्वादयः । गोत्वादीनामपि शब्दत्वं नोररीक्रियते ।

अतस्तर्हि शब्दः कः ? इत्यस्योत्तरे "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. ७) । गौरित्यत्र गौरिति वर्णानुपूर्वि पदमेव शब्दः । येन पदेन शारीरमारुताभिहतकण्ठादिस्थानैः साक्षादवयवद्वारा वाऽभिव्यक्तेन सास्नादियुक्तपदार्थस्य सम्प्रत्ययो भवति, स एव शब्दः । द्रव्यगुणाकृती अतिरिच्य वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा शब्दवाचकत्वं परिपुष्यते । सामान्यतो वर्णानां प्रत्येकं वाचकत्वं वैयाकरणनये न सम्भवति, द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्, तथैव यौगपद्याभावात् । इत्थमुच्चार्यस्य सार्थकस्य पदस्य वा वाक्यस्य शब्दत्वं वैयाकरणनये समर्थितम् । तत्र स्फोटात्मकस्य पदस्य वा वाक्यस्य शब्दत्वं मन्यते । विस्तरेणाग्रे वक्ष्यते ।

तदतिरिक्तं ध्वनेरपि शब्द इति समर्थितः । लोकव्यवहारं दृष्ट्वा अस्माभिर्ध्वनिरपि शब्द इति स्वीकर्तुं शक्यते । सर्वोऽयं लोकव्यवहारो ध्वनिना परिचाल्यते । शब्दं ब्रूहि, मा शब्दं कार्षीः । इत्थं शब्दकार्ययं माणवकः । इति शब्दस्य ध्वनेश्च पर्यायत्वेनोल्लिख्यते । अतो ध्वनिरपि शब्दः । यद्यपि ध्वनिस्फोटयोर्भेदस्तथापि लोकव्यवहारे अभेदेन व्यवहारेऽपि न दोषः । यथा च- "अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. ७) । सार्थकध्वनिसमूह एव शब्द इति । लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णरूपध्वनिसमूह एव शब्द इति स्पष्टीभवति ।

उपर्युक्तोदाहरणेन पदवाक्यरूपस्य सार्थकस्य पदार्थस्य तथैव ध्वनिरूपस्य च शब्दत्वं वैयाकरणनये उभयं स्वीक्रियते इति निष्कृष्यते । शब्दस्य पदवाक्यादिरूपं वा ध्वनिरूपं द्विविधं स्वरूपमस्तीत्यपि निश्चप्रचम् । तर्कशास्त्रेऽपि वर्णात्मकध्वन्यात्मकभेदेन शब्दस्य द्विविधत्वं स्वीकृतम् ।

## शब्दतत्त्वविमर्शः

अस्मिन् संसारे समस्तमपि वाङ्मयं शब्देनौतप्रोतमस्ति । तथैव समस्तो लौकिकव्यवहारोऽपि शब्दात्मकध्वनिना प्रचलति । अतः किं बहुना शब्दं विना न धर्माधर्मव्यवस्था, न गुरुशिष्योपदेशपरम्परा, न चाप्युत्तमाधर्मणव्यवहारादिकमिति । अभिहितञ्च काव्यादर्शे-

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदिशब्दाह्वयं ज्योतिरासंसारं न दीप्यते (काव्यादर्श १/४) ॥

शब्दात्मकं ज्योतिर्यदि सर्वत्र न प्रसरति तदा सर्वं चराचरं जगन्मृतमेवानुभूयेत, शब्दव्यवहाराभावेन जीवा व्यवहारकाठिन्यमनुभूय जडा इव भवन्ति । सर्वाणि धार्मिककार्याणि तथा व्यवहारिककार्याणि च चलितुं न शक्नुवन्ति । अतः शब्दस्य महन्महत्त्वमस्ति । यो ज्ञानस्य विषयः, धर्मस्य कर्मणश्च विषयः स सर्वोऽपि शब्दद्वारैव प्रचलति । शब्दगुम्फितमेव सर्वं ज्ञानमस्ति । यथा च-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ (वा.प. १/१२४ )

एतेन श्लोकेन शब्दस्य सार्वत्रिकत्वं महदुपकारत्वं सूचितमस्ति । एतादृशैः प्रमाणैः शब्दस्य महत्त्वं बोद्धुं शक्यते ।

एवञ्चायं शब्दः प्रत्यक्षादिषु प्रमाणेष्वन्यतम इत्यत्र न विवादः, लौकायतिकसौगतवैशेषिकान् विना । सामान्यतश्चत्वारि प्रमाणानि बहुधा स्वीकृतम् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति । वैयाकरणाश्च शाब्दिकाः सन्ति । अतस्तेषां कृते शब्दा मुख्यानि प्रमाणानि सन्ति । तथा चोक्तम् – "शब्दप्रमाणका वयम् । यच्छब्द आह तदस्माकं प्रमाणमिति" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. ४१) । आप्तोपदेशः शब्दप्रमाणम् । आप्तश्च यथार्थवक्ता । "अर्थात् आप्तो नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान्, रागादिवशादपि नान्यथावादी य स इति चरके पतञ्जलिः" (नागेशः, २०१७, पृ. २६) । एवञ्च परमं प्रामाण्यं प्राप्तस्याप्तोपदेशरूपशब्दस्य किं स्वरूपमिति विमर्शे बहुधा विवदन्ते दार्शनिका मीमांसकाश्च । अत्र नैयायिकमीमांसकानां शब्दस्वरूपं संक्षेपेण निरुप्य वैयाकरणानां शब्दतत्त्वविषयको विचारो विस्तरेण प्रस्तूयते ।

## नैयायिकरीत्या शब्दतत्त्वविचारः

शब्दप्रयोगस्य मुख्यप्रयोजनमर्थबोधनमस्ति । अत्र व्यवहाप्रयोजकशाब्दबोधजननाय शब्दप्रयोगस्य महत्यावश्यकता वर्तते । श्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नैः कैश्चिदेव शब्दैः शाब्दबोधोदयः। न तु अतथा-भूतैरपरैः शब्दैः। नैयायिकवैशेषिकादयो हि शब्दस्य चतुर्विंशतिगुणान्तर्गतत्वेन गुणत्वं मन्यन्ते चेन्मीमांसकादयस्तु द्रव्यत्वं, वैयाकरणाश्च द्रव्यत्वे सति अर्थप्रत्यायकत्वं मन्वते । येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द इति भाष्योक्तसिद्धान्तात् । शब्दतत्त्वप्रतिपादने तार्किकाणां मतमपि विचारणीयमस्ति । तार्किकमतानुसारं शब्दस्य द्विविधो भेदः । ध्वन्यात्मको वर्णात्मकश्च । वर्णात्मकश्च संस्कृतभाषादिरूपः (अन्नम्भट्ट, २०५०, पाना / पानाहरु २४०).) । शब्दस्य गुणत्वेन तस्य तत्त्वं प्रतिपादयन्ति तार्किकाः । प्रत्येकं वर्णा नार्थबोधकाः, धनम्, वनम् इत्यादिषु प्रत्येकमर्थकल्पनस्यासम्भवात्तथा सर्वत्र शक्तिकल्पनाया गौरवात्तत्रार्थबोधकता न तिष्ठति । तथैव वर्णानां समुदायस्यापि सहजकल्पनां कर्तुं न शक्यते, आशुतरविनाशिनां वर्णानां समुदायासम्भवेन तत्रासामर्थ्यात् । यथा क्रियायां प्रतिक्षणं विनाशेन समुदायाभावेनापि समग्रचुल्लीस्थापनदारुकप्रज्वलनतण्डूलस्थापनजलसेचनादिक्रियाणामेका पाचनक्रिया इति व्यवहारः सम्भवति तद्वत् अतीता वर्णा वर्तमानाश्च मानससङ्कलनबुद्ध्या कल्पिततादृशवर्णसमुदाय एव वाचको भवति । यथा देवदत्तो शतमाम्राणि भक्षितवान् इति व्यवहारो भवति । अर्थादत्र वाक्ये मानसकल्पनया समुदायाकारं कृत्वार्थबोधः सम्भवति, तस्माद्वर्णसमुदायस्य वाचकत्वं स्वीकार्यम् । "वर्णानामनित्यत्वेऽपि उत्तरोत्तरवर्णे पूर्वपूर्ववर्णवत्त्वमव्यवहितोत्तरत्वसम्बन्धेन संस्कारवशाद् गृह्यते इति पदस्य प्रत्यक्षत्वाच्छाब्दबोधः" (नागेशः, २०१७, पृ. ६७) । उपर्युक्तकथनेन वर्णानां विनाशेऽपि पूर्वपूर्ववर्णवत्त्वमव्यवहितोत्तरात्वेन संस्कारेण गृहीते घट इत्युच्यमाने घकारानुपूर्व्युत्तराकारानुपूर्व्युत्तरटकारानुपूर्व्युत्तराकारानुपूर्वीको घटः इति पदप्रत्यक्षत्वेन शाब्दबोधे न बाधा इति मतमस्ति । अथवा नैयायिकानां मते आशुविनाशिनां वर्णानां समुदायस्य कल्पना कथं कर्तुं शक्यते ? कथञ्च संस्कारो गच्छति ? इत्युच्यते चेत्तत्र द्वितीयं समाधानमप्यवलोकनीयम् । यथा- "यद्वा पूर्वपूर्ववर्णजाः शब्दाः शब्दजशब्दन्यायेन चरमवर्णप्रत्यक्षपर्यन्तं जायमाना एव सन्तीति न पदप्रत्यक्षानुपपत्तिः" (नागेशः, २०१७, पृ. ६७)। अर्थात् यथा घट इत्यत्र घकारादकारो जातः, ततश्च टकारस्ततोऽकार इति एकस्यैव

वर्णाज्जन्यत्वेन घट इति पदस्य प्रत्यक्षविषयाच्शाब्दबोध इति। यदि शब्दजशब्दन्यायोऽस्वीक्रियते तर्हि तृतीयोपायत्वेन पूर्वपूर्ववर्णानुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभवेन पदप्रत्यक्षत्वाच्छाब्दबोध इति स्वीकार्यं भवति। अतो वर्णसमुदायः शब्द इति नैयायिकराद्धान्तः। शब्दस्य नित्यत्वं ब्रह्मस्वरूपत्वं नैव स्वीकुर्वन्ति नैयायिकाः। शब्दस्य गुणत्वमाकाशदेशस्थत्वं तथाप्तोपदेशरूपत्वं मन्वते।

## मीमांसकमते शब्दविषयको विचारः

मीमांसकास्तु वर्णस्फोटवादिनः सन्ति। शब्दस्य द्रव्यत्वं चैषाम्मते, वाचकावाचकभेदेन शब्दस्य द्वैविध्यम्। भेरीमृदङ्गादिजन्यध्वनिव्यङ्ग्योऽवाचकः, ताल्वादिव्यापारजन्यध्वनिव्यङ्ग्यो वर्णात्मको वाचकः। नागेशभट्टेन स्फोटनिरूपे मीमांसकमतं खण्डयितुं तेषां शब्दविषयकं मतमपि तत्र प्रस्तुतम्। यथा-- "वर्णा प्रत्येकमिति" (नागेशः, २०१७, पृ. ६६)। तत्रापि साधुशब्देऽन्तर्गतास्तिबादिभ्यो स्मृता लकारादयः स्थानिन एव वाचकाः। तिब्विसर्गादयो न वाचकाः, यतो हि स्थानिनो वाचकत्वे लाघवं भवति। तिब्विसर्गादयस्तु स्थान्यर्थाभिधानसमर्था आदेशाः सन्ति। तिब्विसर्गादिषु च शक्तिभ्रमाद् बोधो भवति। वर्णा एव समुदिताः पदवाक्याभिधेयाः शाब्दबोधजनकाः भवन्ति। अर्थाद्वर्णानां संघातः पदं भवति, तथैव वर्णसमुदितानि पदानि सम्मिल्य वाक्यानि भवन्ति। वर्णानां यद्यपि प्रत्येकमर्थबोधकत्वं नाऽस्ति। किन्तु कलश इत्यादौ ककारादिसमुदितीभवन् समर्थः सार्थको भवति यथा सुराङ्गं प्रत्येकमुन्मादशक्तिरहितमपि समुदितं मादकम्भवतीति सर्वजनैः सुज्ञेयम्। यद्यपि एषां मते वर्णाः नित्यास्तथापि प्रयत्नकरणेन कदाचिदेवाभिव्यज्यन्ते। ताल्वादिव्यापाराणामतदभिव्यञ्जकत्वमेव न तु वर्णजनकत्वमिति।

## वैयाकरणसम्मतशब्दतत्त्वविमर्शः

"येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्ययः स शब्दः" (पतञ्जलिः, व्याकरणमहाभाष्यसम्, २०१९, पृ. ७) इति महाभाष्योक्त्या अर्थप्रत्यायकत्वं शब्दसामान्यलक्षणम्। लक्षणेनानेनेदं निश्चीयते यत् व्यवेहारनिबन्धनोऽर्थप्रत्ययः शब्दः। अत एव अर्थावबोधजननसमर्थः वर्णातिरिक्तः स्फोटपदाभिधेयः स्वीकार्यः, अर्थीस्फोटनहेतुतया स्फोटः, ध्वनिव्यङ्ग्यतया वा स्फोटः। न तु नैयायिकस्वीकृतो मानसशब्दसमूहरूपः, वा संस्कारयुक्तशब्दसमूहरूपः शब्दः। मीमांसकस्वीकृतः प्रत्येकं वर्ण अपि शब्दो भवितुं न शक्नोति। उत्पत्तिविनाशवद्वर्णसमुदायस्य वर्तमानादेव वर्णसमुदायस्य शब्दत्वं वा केवलं वर्णस्य च शब्दत्वं स्वीकर्तुमशक्यम्। नैयायिकरीत्या यदि संस्कारयुक्तवर्णानां समूहस्य शब्दत्वं स्वीकरणीयं तर्हि कदाचिद् विपरीतसंस्कारेण सरः इति रसः, नदी इति दीन इत्यादिकं स्यात्तथैव नष्टविद्यमानयोः शक्तिसंस्कारस्वीकारश्च कर्तुमशक्यम्। यथा-"येन क्रमेणानुभवस्तेनैव क्रमेण तत्संस्कारस्थितिरित्यत्रविनिगमकाभावात्सरोरसोनदीदीनइत्यादौविपरीतसंस्कारोद्बोधेनप्रत्येकमन्यार्थप्रत्ययापत्तेः" (नागेशः, २०१७, पृ. ६७) इति। यदि कृतमपि तर्हि नष्टो घटो जलवान् इत्यादिवदुपहासापत्तिः। अतो नैयायिकमीमांसकस्वीकृतशब्दतत्त्वं विहायान्यादृशमेव शब्दतत्त्वं स्वीकार्यं यत्तत्त्वं नित्यरूपं सर्वत्र दोषरहितञ्च स्यात्। तादृशो दोषरहितः शब्दस्तु स्फोट एव। एवम्भूतः स्फोटः शब्दपदेन गृह्यते। स्फोटो हि नित्यः, अखण्डः एकश्च सिद्धान्तः स्वीक्रियते। स्फोटस्य च इत्थं विग्रहः क्रियते- "स्फुट्यते वर्णादिभिरभिव्यज्यते" इति, "स्फुटत्यर्थोऽस्माद्"इति वा स्फोटः। अर्थाद्वैयाकरणनये शब्दस्य ध्वनिरूपत्वं वर्णात्मकस्फोटरूपत्वञ्च द्विविधं स्वीकृतम्। शब्दनित्यतावादीनां वैयाकरणानां कृते ध्वनिरूपस्य शब्दस्वरूपस्य सर्वथा स्वीकारेऽनित्यत्वं स्याद्यतो हि ध्वनेरनित्यत्वात्। अतः स्फोटरूपत्वमेव सिद्धान्ततो स्वीकृतम्। आपाततस्तु ध्वनिरूपं शब्दरूपमिति द्वयं स्वीकर्तुं शक्यते परं परमार्थतस्तु स्फो-

टरूपमेवास्ति।

ध्वनिरपि स्फोटव्यञ्जकोऽस्ति। मध्यमाध्वनिर्वा नाद एव स्फोटव्यञ्जकोऽस्ति। वाचश्चातुर्विध्यं वैयाकरणैः स्वीक्रियते। तत्र कस्याः कस्या वाचो कुत्र कुत्रावस्थितिरिति अधस्थश्लोकाभ्यां ज्ञायते। यथा-

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥
वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते (नागेशः, २०१७, पृ. ७०)॥ इति॥

एताभ्यां श्लोकाभ्यां ज्ञायते यत्- शरीरे चतुर्णां नादानां चतुर्षु स्थलेष्ववस्थितिर्भवति, योगिनां समाधौ पराप श्यन्त्योरनुभवो भवति, हृदिस्थस्य मध्यमनादस्य तु सर्वेषामनुभवस्तत एव स्फोटस्यानुभूतिर्भवति, अत एव स्फोटव्य-ञ्जक एव तादृशो ध्वनिः, तथैव कण्ठदेशस्थो वैखरी ध्वनिस्तु परश्रवणगोचरः भेर्यादिनादवन्निरर्थको भवति। मध्य-मानाद एवार्थवाचकः स्फोटात्मकशब्दव्यञ्जकश्चः। "तादृशमध्यमानादव्यङ्ग्यः शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च" (नागेशः, २०१७, पृ. ७०)। उपर्युक्तेन नागेशकथनेन शब्दतत्त्वस्य निर्वचने मध्यमारूपध्वनिव्यङ्ग्यः यः शब्दः भवति, स एव वैयाकरणनिकाये स्फोटरूपः ब्रह्मरूपः नित्यरूपश्च स्वीक्रियते इति स्पष्टीभवति। स्फोटात्मकमेव शब्दस्वरूपं भवति, वृत्याश्रयश्च स्फोटो भवति। तस्य स्फोटस्यैकत्वेऽपि कार्यसम्पादनाय वर्ण-पद-वाक्यादिभेदेन अष्टविधत्वं स्वीकृतमस्ति। एकस्यैवाकाशस्य घटाकाशमठाकाशादिवदेकस्यैव स्फोटस्य कार्यसम्पादनायानेके भेदाः सन्ति, परन्तु वस्तुत एक एव स्फोटोऽस्ति। तत्रापि स्फोटस्याष्टविधत्वेऽपि अखण्डवाक्यस्फोटस्यैव निष्कर्षतो स्फो-टरूपत्वं शब्दरूपत्वं स्वीकुर्वन्ति वैयाकरणाः। वाक्यादेव सर्वजनानामर्थबोधनेन अर्थप्रत्यायकत्वमेव शब्दस्य सा-मान्यलक्षणादखण्डवाक्यस्फोटस्यैव शब्दरूपत्वं स्वीकर्तव्यम्। ध्वनिभिरभिव्यक्तिस्वीकारेण स्फोटस्य सदा वर्तमा-नतया सार्वत्रिकः शाब्दबोधो न भवति।

स्फोटवादे त्रिमुन्यभिमतम्

स्फोटवादे सूत्रकारस्याप्याशयो नित्यरूपत्वं शब्दतत्त्वमित्यस्ति। यथा- "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (अष्टाध्यायी १/२/४५) इत्यत्र स्फोटवादानभ्युपगमे अर्थवदेशाभावेन प्रातिपदिकसंज्ञाविधानानुपपत्तिः। नित्यस्फोट-मन्तरार्थविषयक-बोधजनकत्वरूपाशक्तिः आश्रयाभावे कुत्र तिष्ठेत्। तस्मात् तदनुपपत्या स्फोटो नित्यः एकश्च स्वी-क्रियते। एवमेव "युष्मदस्मद्भ्यां ङसोऽश्" (अष्टाध्यायी ७/१/२७) इति सूत्रे शिदादेशविधानसामर्थ्यादपि सूत्रकर्तुः स्फोटवादः नितरां सम्मतो भाति। अनेन च शित्करणे सूत्रकारीयं "सर्वे सर्वपदादेशाः०" इत्याद्युपर्युक्तवचनं ज्ञाप्यते। एवञ्च सूत्रकारो "अवङ् स्फोटायनस्य" (अष्टाध्यायी ६/१/१२३) इति सूत्रे महर्षिस्फोटायनस्मृत्या स्वसम्मतस्फोट-वादं दृढीकरोति। वार्तिककारस्य कात्यायनस्यापि स्फोटवादेऽभिरुचिः, यतो हि "सिद्धे शब्दार्थसम्बन्धे" (पतञ्ज-लिः, व्याकरणमहाभाष्यम्, २०१९, पृ. २७) इति व्याख्यावसरे शब्दनित्यत्वकथनेन स्वसम्मतं स्फोटवादमुपस्थाप-यामास वार्तिककृत्। श्रीकात्यायनेनापि वार्तिकेऽस्मिन् शब्दपदेन स्फोट एव गृहीतः। अत्र वार्तिकशब्दपदेन न ध्वनेर्ग्रहणं किन्तु नित्यस्य स्फोटस्यैव ग्रहणं तदितरस्य नास्ति सिद्धत्वरूपनित्यतेति बोध्यम्। अपि च "स्वं रूपं शब्दस्याशब्दसंज्ञा" (अष्टाध्यायी १/१/६८) इत्यस्मिन् सूत्रे शब्देनार्थस्यासम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरू-पवचनम् "न वा शब्दपूर्वको ह्यर्थे सम्प्रत्ययस्तस्मादर्थनिवृत्तिः" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ.

५२१) इति वार्तिकद्वयं कुर्वता तेन स्फोटवादः सम्यक् उररीकृतः, अन्यथा स्फोटाभिन्नस्य शब्दस्यानभिमतत्वे तत्राद्‌र्थबोधकत्वासम्भवेनोक्तवार्तिकयोरनुत्थितिरेव स्यात् । अनया शैल्या बहुषु स्थलेषु स्फोटवादस्य पोषणं प्रतीयते । स्फोटविषये भाष्यकारेणापि बहुत्र स्थले उक्तमस्ति । सिद्धे शब्दार्थसम्बन्धे इति वार्तिकं व्याख्यायता च वर्णैः कूटस्थैरविचालिभिरनपायोपजनाविकारिभिर्भवितव्यमित्यादि वर्णितम् । तथैव महाभाष्ये उक्तञ्चैतद् महाभाष्यकारेण "एक इन्द्रशब्द आहूतो युगपत् सर्वयागेष्वङ्गं भवति " (नागेशः, २०१७, पृ. ६८) । अत्र इन्द्र इति पदमिन्द्रशब्द इत्यर्थकम् । आहूत इति च प्रादुर्भूत इत्यर्थकम् । विभुत्वमन्तरा एकस्य इन्द्रशब्दस्यानेकत्राभिव्यक्तिर्न सम्भवतीति विभुत्वमेकत्वञ्च सुष्ठु सिद्धयतः। नित्यत्वविभुत्वानुगतमेव । सिद्धे० इति पूर्वोक्तवार्तिकव्याख्यानसन्दर्भे पतञ्जलिना उक्तम्- "संग्रहे तावत् कार्यप्रतिद्वन्द्विभावान्मन्यामहे वयम् । नित्यपर्यायवाचिनोर्ग्रहणमिति । इहापि तदेव इति" (पतञ्जलिः, व्याकरणमहाभाष्यम्, २०१९, पृ. २८) कथनेन नित्यत्वं स्फोटात्मकमेव स्वीकृतम् । स्फोटश्च जातिस्फोट एव । वाक्यजातिस्फोट एव वैयाकरणन्याये सर्वतोभावेन स्वीकृतः । यथा- "अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता" (वाक्यपदीय १/९३) इति । व्यक्तीनामानन्त्येन तत्र स्फोटत्वस्वीकारे गौरवाज्जातिस्फोट एव स्वीकार्यः ।

अत उपर्युक्तैः समग्रैः कथनैर्वैयाकरणसिद्धान्तालोडनेन शब्दस्वरूपविषयाः त्रयः सिद्धान्ताः समुपस्थिताः भवन्ति-

१. ध्वनिसमूहान्तर्गतो बुद्धिस्थः शक्तिविशेषः शब्दः।

२. स्फोटापरपर्यायः जातिशब्दः।

३. स्वस्वरूपेण सहान्येषामपि वस्तूनां प्रत्यायको ध्वनिविशेषः शब्दः। इति त्रिविधम् ।

"प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तस्मात् ध्वनिः शब्दः" इति भाष्याशयस्तु कैयटेनेत्थमुक्तम् -

"अन्यत्र ध्वनिस्फोटयोर्भेदस्य व्यवस्थापितत्वादिहाभेदेन व्यवहारेऽपि न दोषः, एवञ्च ध्वनिव्यङ्ग्यः स्फोट एव शब्दः वैयाकरणमते स्वीकृतोऽस्ति । स च नित्यः ब्रह्माख्यो वर्तते" (कैयटः, २०१९, पृ. ७) । शब्दस्य गुणत्वं वा द्रव्यत्वं वेति विविच्यते । गुणाश्रयत्वं द्रव्यस्य लक्षणम् । शब्दे तारत्त्वादिगुणाश्रयतया द्रव्यत्वमाकाशरूपद्रव्याश्रिततया गुणत्वञ्चेत्युभयं स्वीकृतम् । भाष्यकारेण अतत्थैश्च गुणैः समासो वाच्यः इति वार्तिके नदी, घोषः, पटहशब्दोदाहरभणेन आकाशदेशः शब्दः इत्याद्युक्त्वा च आकाशाश्रितत्वेन गुणत्वं स्वीकृतम् । पातञ्जलानुगामिनो योगिनस्तु वर्णानां वाचकत्वं नाभ्युपगच्छन्ति । तैश्च वर्णातिरिक्तस्य पदस्य, पदातिरिक्तस्य वाक्यस्य वाचकत्वं स्वीक्रियते । स्फुट्यते ध्वनिनाभिव्यज्यते इति कर्मव्युत्पत्या, स्फुटत्यर्थोऽनेनेति करणव्युत्पत्या च घञन्तः स्फोटः शब्दो निष्पद्यते। तथा च ध्वनिव्यज्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटसामान्यलक्षणमिति फलितम् । अत्र महाभाष्यस्वारस्यमप्यस्ति, महाभाष्यानुगामिना महावैयाकरणेन भर्तृहरिणापि अखण्डरूपत्वं समर्थितम् । यथा-

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।

वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥ (वाक्यपदीय १/७३) इति ।

एतेन पदे वर्णविभाजनं, वाक्ये पदविभाजनमेव कर्तुं न शक्यते इति कृत्वा पदसम्पादकस्य प्रकृतिप्रत्ययसाधकस्य पाणिनीयादिग्रन्थस्य निःसारता च न वर्णिता, यतो हि तादृशविधायकस्य व्याकरणस्य सुधी+उपास्यः इति स्थाने सुध्युपास्य इति प्रयोक्तव्य इत्यात्मकत्वं सर्वेषु सर्वादेशत्वमित्यात्मकं बोद्धव्यम् । आदेशस्याप्यनित्यत्वेन कथं शब्दस्य नित्यत्वं तत्र कृतकत्वादिति तु न शङ्क्यम्, बौद्धशब्दार्थस्य वैयाकरणैः स्वीकारात्, आदेशस्योपायप्रदर्शनमेव

मन्तव्यम्। यथा-

पञ्चक्रोशादिवत्तस्मात्कल्पनैषा समाश्रिता।
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः (कौण्डभट्ट, २०२९, पृ. ५२६)॥ इति।

एतेन शब्दनित्यात्मको वैयाकरणसिद्धान्तो न हन्यते। "सिद्धे शब्दार्थसम्बन्धे" इति वचनेन शब्दस्य सिद्धरूपत्वमर्थात् नित्यरूपत्वमेव स्वीकर्तव्यमिति महाभाष्यकृता पस्पशाह्निके शब्दस्वरूपं निरूपयता उक्तमस्ति। नित्यरूपैः शब्दैः कूटस्थैरविचालिभिर्भवितव्यमिति। असाधुशब्दत्यागेन साधुशब्दस्य प्रयोग एव सर्वत्रास्ति, अत वैयाकरणन्याये सर्वस्य स्थाने सर्वादेशा इति उक्तं भगवत्पादैः। तत्र अर्थवत्त्वादेशे लोपार्थम् इति वार्तिकं व्याख्यायता भगवता सर्वस्य सर्वादेशा इत्युक्तम्। यथा-

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते (पतञ्जलिः, महाभाष्यम्, २०१९, पृ. ३१)॥ इति।

नित्यात्मकं शब्दतत्त्वमक्षररूपमस्ति। यस्य नाशः सर्वथा भवितुं न शक्नोति, वेदान्तीनां यथाद्वैतवादोऽस्ति, तादृश एव वैयाकरणानामपि शब्दब्रह्मवादोऽस्ति। शब्दतत्त्वञ्चादिमध्यान्तहीनं देशकालसीमहीनं विनाशरहितं ब्रह्मरूपमस्ति। सर्वेऽपि पदार्थास्तस्यैव ब्रह्मणो विवर्तभावेन स्थिताः, विवर्तश्च अतत्त्वतोऽन्यथाप्रथारूपा अस्ति, स्वस्य स्वरूपं अत्यक्त्वा अन्यरूपस्य प्रतीतिरिति अर्थात् रज्जौ उरगस्य मिथ्याज्ञानं यथा भवति तद्वच्छब्दब्रह्मणि जगतः पदार्थानां ज्ञानं भासते, वस्तुतस्तु शब्दमात्रमेवास्ति। शब्दार्थयोस्तादात्म्यादेव युगपच्छब्दस्यार्थस्य च प्रतीतिर्भवति, अतो संसारे शब्दादतिरिक्तं वस्तु एव नास्ति।

तथा चोक्तम् -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ (वाक्यपदीय १/१) इति।

व्यापकं खलु शब्दब्रह्म समग्रस्य विश्वस्य पदार्थानां कारणमप्यस्ति। यस्य नाशोत्पत्ती च न सम्भवतः। सदैव वर्तमानतया उत्पत्तिविनाशरहितत्वेन नित्यस्वरूपं शब्दब्रह्म उच्यते। भर्तृहरिणा शब्दब्रह्मणो न ध्वनिरूपं नित्यं समर्थितं न च लोके प्रयुक्तं वर्णरूपम्। तदतिरिक्तस्य पृथक्छब्दस्वरूपस्यैव शब्दब्रह्मरूपेण समर्थितम्। यस्माच्छब्दाज्जगतः पालनादिरूपं सम्भवेत्, तादृशस्य नित्यस्य शक्तिवतः शब्दब्रह्मणः पुष्टिः कृता। अनादिनिधनं ब्रह्म इत्यादिभिर्वचनैः शब्दब्रह्मण विवर्तवाद एव समर्थितः। कौण्डभट्टादिविदुषा च स एव समर्थितः। केचन च परिणामवादं स्वीकुर्वन्ति। शब्दस्य परिणामः सर्वं जगदिति तत्तु भर्तृहर्यादिविदुषा न समर्थितम्। वेदविज्ञाः शब्दस्य परिणामः संसारः इति मन्वते। वेदेभ्य एव इदं विश्वं विववृते। वेदाश्च शब्दरूपाः सन्ति, तेषां शब्दवशादेव जगतः सृष्टिस्थितिप्रलयप्रक्रिया सम्पद्यते। जगति प्रचलितं ध्वनिरूपं वर्णरूपं च शब्दरूपं तस्यैव शब्दब्रह्मणो भ्रान्तिरूपमस्ति। वस्तुतः शब्दब्रह्म कूटस्थं नित्यमविचालि वर्तते। शब्दब्रह्मण एकत्वमस्ति। श्रुतौ तस्य एकत्वमेव समर्थितमस्ति। इदं ब्रह्म च समस्तकार्येभ्यस्तथा तदुत्पादकेभ्यः कारणेभ्यः परमस्ति, तथा कार्याणि कारणानि चैकानि वा बहूनि स्युः शब्दब्रह्म च सदैव एकत्वरूपं बिभर्ति। अद्वैततत्त्वरूपेण शब्दब्रह्मणोऽवधारणा युक्तिसङ्गता तथा च श्रुतिसङ्गता। वेदान्तिनो यं ब्रह्मेति विदन्ति, तदपि शब्दब्रह्मरूपमेवास्ति। स्वयंप्रकाशश्च तदेव तत्त्वमस्ति। यथा बृहदारण्यके- "सलिल एको द्रष्टाऽद्वैतो भवति" (बृहदारण्यकोपनिषद् ६/३/३२ ), छान्दोग्योपनिषदि "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्"

(छान्दोग्योपनिषद् ६/२/१), तथैव कठोपनिषदि उक्तम्-

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्" (कठोपनिषद् १/२/१५)॥

इत्यादिविविधैर्वचनैः शब्दब्रह्मण एकत्वमद्वितीयं परब्रह्मरूपञ्च श्रुतयः साधयन्ति । तथैव श्रीमद्भगवद्गीतायाञ्च-

"ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्" (श्रीमद्भगवद्गीता ८/१३), "ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" (श्रीमद्भगवद्गीता १७/२३) इत्यादिवचनानि ओंकारादिशब्दानेव ब्रह्मरूपं नित्यरूपं जगतः साररूपं च वर्णयन्ति। वैयाकरणप्रतिपादितः शब्दब्रह्मसिद्धान्तः युक्तिसङ्गतः श्रुतिसङ्गतश्च वेविद्यते। एकत्वस्याभिप्रायो द्वित्वस्य न निधेषरूपमपितु तदतिरिक्तं किमपि नास्ति इत्यर्थरूपं दृष्टं जगत्प्रपञ्चमविद्याकार्यमेव वस्तुतो शब्दब्रह्म एव नित्यं साररूपञ्च। एकमद्वैतञ्च सदपि तदाश्रितानामनेकशक्तीनां कारणेन जगति भेदव्यवहारोऽनुभूयते, परन्तु ब्रह्म शक्तिभ्यः पृथग् नास्ति, यतोहि ब्रह्मणोऽतिरिक्तं वस्तु एव नहि। जगतः सृष्टिप्रक्रियायां नित्याच्छब्दब्रह्मणः कथं जन्मादयः षड्विकारा भवन्ति इति शङ्कायां शब्दब्रह्मणः कालशक्तिरूपा विचित्रा शक्तिरस्तीति स्वीकर्तव्यम्। सैव शक्तिरारोपितभेदवती सती जन्म-सत्ता-विपरिणाम-वृद्धि-अपक्षय-विनाशरूपान् षड्भावविकारान् जनयति। विकाराणां कारणं भवति। इत्थं शब्दब्रह्मापि कालशक्त्यैव जगद्रूपेण विवर्तते। अन्यथा नित्याच्छब्दब्रह्मणः कथं सृष्टिः ? सर्वस्य कारणरूपं भोक्तृभोक्तव्यभोगरूपेण स्थितञ्च तदेव ब्रह्म इति शब्दब्रह्मणः स्थितिः। स्वयंप्रकाशरूपं प्रकाशकरूपं कार्यकारणरूपं सर्वमेव शब्दब्रह्म इति। यथा-

प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता।

अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा (वाक्यपदीय २/३२)॥ इति।

**निष्कर्षः**

एवंप्रकारेण शब्दब्रह्म च जगतो न निमित्तकारणमात्रमपितु उपादानकारणमपि उपर्युक्तवचनैः पुष्टिमेति। शब्दब्रह्मणः प्राप्त्युपायश्च वेद एवास्ति, यः पूर्वमक्रमरूपेण महर्षिभिः साक्षात्कृतः पश्चादृषिवैविध्यादनेकरूपेण स्थितोऽस्ति। वेदोऽपि शब्दब्रह्मणोऽनुकारोऽस्ति। लोकव्यवहार्यशब्दभिन्नं स्फोटरूपं वर्णरूपं तथा च समस्तजगतोः कारणरूपमविनाशि परब्रह्मरूपं च शब्दब्रह्म इति वैयाकरणसिद्धान्ते प्रतिपादितम्। शाब्दिकानां मते शब्दादतिरिक्तं किमपि नहि। "न सोऽस्ति प्रत्ययो लोके"(वाक्यपदीय) इत्यादिवचनान्यपि शब्दस्य महत्त्वं प्रतिपादयन्ति। समस्तज्ञानस्य कारणं जगतो भावानां कारणं पदार्थानामुपादानकारणञ्च शब्दब्रह्म एव। मध्यमानादव्यङ्गः स्फोटरूपेण च शब्दशास्त्रे प्रयुक्तः शब्दोऽन्येषां नैयायिकमीमांसकादीनां मतापेक्षया ज्यायान् गरीयाँश्च दृश्यते। वर्णादिस्फोटानां विभागोऽपि शास्त्रकार्यसम्पादकार्थमस्ति। वस्तुतो वाक्यस्फोटस्यैव प्रामुख्यमिति समेषां वैयाकरणानां मतम्। लोकव्यवहारे प्रयुक्तं ध्वनिरूपं तत्त्वं तु आपाततो शब्दरूपं स्वीकरणीयम्। यतो हि शब्दस्य नित्यत्वं सर्वैराम्नातम्। ध्वनिस्त्वनित्योऽतो लोकव्यवहारे ध्वनिशब्दयोरपृथक्त्वेन व्यवहारेऽपि शास्त्रे पृथग्रूपत्वं मन्तव्यम्। मध्यमाध्वनिना वा नादेन व्यञ्जितः स्फोटः शब्दरूप इति विदुषां प्रवादः। अद्वैतवेदान्तिनां परब्रह्मणो यादृशं रूपं तादृशं रूपं शब्दब्रह्मणोऽपि। परब्रह्मशब्दब्रह्मणोरभेदोऽपि नितरां सिध्यति। समग्र चराचरस्य कारणमादिमध्यान्तहीनमविनाशि परब्रह्म शब्दब्रह्म एव, तस्मादन्यत् किमपि नहि इत्येतावद्रूपं भर्तृहर्यादिविदुषां विराड्रूपस्य शब्दब्रह्मणो पृथक्स्वरूपं मतरूपेण

स्थितमस्ति। शब्दब्रह्मण एव सृष्टिस्थितिलयादयः सम्भवन्तीति विषये न विदुषामेव मतमपितु श्रुतयोऽप्यत्र प्रमाणीभूताः सन्तीति। अन्येषां शब्दविषयमतान्यालोच्य वैयाकरणसम्मतं शब्दब्रह्मरूपं मतं सर्वानतिशेते।

## सन्दर्भग्रन्थसूची

अन्नम्भट्ट. (२०५०). तर्कसंग्रहः. (प. मिश्र, सं..) दिल्ली : परिमल पब्लिकेशन्स.
कैयटः. (२०१९). महाभाष्यप्रदीपः. हरियाणा : हरियाणासंस्कृतसंस्थानम्.
कौण्डभट्ट. (२०२९). वैयाकरणभूषणसार. वाराणसी : मकरन्द अरविन्द मिश्र.
घनश्यामदास जालान (सं.). (२००८). कठोपनिषद्. गोरखपुर : गोताप्रेस गोरखपुर.
घनश्यामदास जालान (सं.). (२०१३). छान्दोग्योपनिषद्. गोरखपुर : गीताप्रेस गोरखपुर.
जालिमसिंह, र. ब. (सं.). (सन् १९२३). बृहदारण्यकोपनिषद्. लखनउ : नयनकिसोर प्रेस
दण्डि, आ. (सन् १९३८). काव्यादर्शः. (र. शास्त्री, सं.) नया दिल्ली : भण्डारकर ओरन्टियल रिसर्च इन्स्टिट्च्युट.
नागेशः. (२०१७). परमलघुमञ्जूषा. (कालिकाप्रसादशुक्लः, सं.) बडौंदा : महाराजसयाजिरावविश्वविद्यालयः.
पतञ्जलिः. (२०१९). महाभाष्यम् (संस्क. पञ्चमो भागः). (वेदव्रत, सं.) रोहतक : हरियाणा साहित्य संस्थानम्.
पतञ्जलिः. (२०१९). व्याकरणमहाभाष्यम् (द्वितीयः सं., संस्क. प्रथमः). (वेदव्रत, सं.) हरयाणा : हरियाणासंस्कृतसंस्थानम्.
प्रकाशचन्द्र ए. किशोराणि. (सन् २०१०). नागेशभट्टका व्याकरणदर्शन चिन्तन. जयपुर : हंसा प्रकाशन.
भर्तृहरिः. (२०१३). वाक्यपदीयम्. (ज. उप्रेती, सं.) दिल्ली : परिमल पब्लिकेशन
वेदव्यास. (२०१५). श्रीमद्भगवद्गीता (त्रयस्त्रिंशत् सं.). (स. रामसुखदास, सं.) गोरखपुर : गीताप्रेस गोरखपुर.